# Skandaproktam Shivasharanagatyupadesham

# સ્કન્દપ્રોક્તં શિવશરણાગત્યુપદેશમ્

## Document Information

Text title : Skandaproktam Shivasharanagatyupadesham

File name : skandaproktaMshivasharaNAgatyupadesham.itx

Category : shiva, shivarahasya, upadesha, advice

Location : doc_shiva

Proofread by : Ruma Dewan

Description/comments : shrIshivarahasyam | sadAshivAkhyaH navamAMshaH | adhyAyaH 65 | vAvRRittashlokAH ||

Latest update : July 14, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

July 14, 2024

*sanskritdocuments.org*

# સ્કન્દપ્રોક્તં શિવશરણાગત્યુપદેશમ્

(શિવરહસ્યાન્તર્ગતે સદાશિવાખ્યે)

સ્કન્દઃ (ઉવાચ) ।

ભક્તાઃ સર્વે શિવં ધ્યાત્વા કલાવેવં ભવન્તિ હિ ।
શિવભક્તાન્ સમુદ્વીક્ષ્ય શિવભાવાનુચિન્તકાન્ ॥ ૩૨॥

નીચા અપિ શિવે ભક્તા ભવન્ત્યેવં હિ શૈલજે ।
કર્મણા મનસા વાચા સર્વભાવેન શઙ્કરમ્ ॥ ૩૩॥

યે પ્રપન્ના મહાદેવં તે ભવન્તિ ગણેશ્વરાઃ ।
ચરણં કરુણામ્ભોધેર્મમ યે શરણં ગતાઃ ॥ ૩૪॥

નૈવામ્નજનનાસ્તેઽમી પરિચ્છેદ્યાઃ કથં પરૈઃ ।
લોકાનાલોકયન્તોઽપિ નિલયાય લયં મમ ॥ ૩૫॥

નિઃસીમ મહિમાનસ્તે વર્ણનીયાઃ કથં પરૈઃ ।
સ્મરન્તિ ચ સ્મરારાતેઃ સદા પદસરોરુહમ્ ॥ ૩૬॥

મત્સ્તુતૌ ગદ્ગદતરહર્ષબાષ્પપરિપ્લુતાઃ ।
નેત્રામ્બુનિર્ઝરાસેક પુલકાઙ્કુરભૂષણાઃ ॥ ૩૭॥

નાદાન્તરૂપે હૃદયામ્બુજસ્થે
શિવે પરઞ્જ્યોતિષિ ચિન્ત્યરૂપે ।
વિન્યસ્ય ચિત્તં વિરતાન્યકામા
કામારિધામૈકગતા ભવન્તિ ॥ ૩૮॥

વિન્યસ્યતાં ચિત્તમુમાસહાયે
યે ભક્તમાહાત્મ્યમિદં મહાર્થમ્ ।
દધન્તિ ચિત્તે સતતં નરો યઃ
પરાત્પરં શૈવપદં પ્રપદ્યતે ॥ ૩૯॥

ત્રિષષ્ટિભક્તાઃ શિપિવિષ્ટનિષ્ઠાઃ

કનિષ્ઠવર્ણા અપિ તે વિશિષ્ટાઃ ।
ઇષ્ટઃ શિવસ્યાબ્જપદૈકભક્તિ-
નિષ્ઠા હિ કષ્ટાનપિ નાશયન્તિ ॥ ૪૦॥

સંસારાબ્ધૌ વિષમવિષયાગાધબાધૈકગર્તે
જન્માવૃત્ત્યૈવ મર્ત્યા મરણભયમહાવાત્યયા શુષ્કપર્ણાઃ ।
વ્યાવૃત્તેવ પ્રભવતિ શિવે માનવા ભારતેઽસ્મિન્
કામક્રોધાભિલોભોન્મદમૃદિતમહાનક્રવક્ત્રાન્તરાલે ॥ ૪૪॥

નવગ્રહાવગ્રહવિગ્રહાર્તિ-
જન્યં ભયં નૈવ શિવેઽદ્રિકન્યે ।
મામુગ્રમીશં શરણં પ્રપન્ના
નૈવેન્દ્રિયગ્રામપરા ભવન્તિ ॥ ૪૫॥

॥ ઇતિ શિવરહસ્યાન્તર્ગતે સ્કન્દપ્રોક્તં શિવશરણાગત્યુપદેશં સમ્પૂર્ણમ્ ॥

- ॥ શ્રીશિવરહસ્યમ્ । સદાશિવાખ્યઃ નવમાંશઃ । અધ્યાયઃ ૬૫ । વાવૃત્તશ્લોકાઃ ॥

- .. shrIshivarahasyam . sadAshivAkhyaH navamAMshaH . adhyAyaH 65 . vAvRRittashlokAH ..

Proofread by Ruma Dewan

*Skandaproktam Shivasharanagatyupadesham*
pdf was typeset on July 14, 2024

Please send corrections to *sanskrit@cheerful.com*